भगवद्धर्मसामर्थ्याद्विरागो विषये स्थिरः ।
गुणैर्हरेः सुखस्पर्शान्न दुःखं भाति कर्हिचित् ॥१५॥
एवं ज्ञात्वा ज्ञानमार्गदुत्कर्षो[1] गुणवर्णने ।
अमत्सरैरलुब्धैश्च वर्णनीयाः सदा गुणाः ॥१६॥
हरिमूर्तिः सदा ध्येया संकल्पादपि तत्र हि ।
दर्शनं स्पर्शनं स्पष्टं[2] तथाकृतिगती सदा ॥१७॥
श्रवणं कीर्तनं स्पष्टं पुत्रे कृष्णप्रिये रतिः ।
पायो[3]र्मलांशत्यागेन शेषभा[4]गं तनौ[5] नयेत् ॥१८॥
यस्य वा भगवत्कार्यं यदा स्पष्टं न दृश्यते ।
तदा विनिग्रहस्तस्य कर्तव्य इति निश्चयः ॥१९॥
नातः परतरो मंत्रो नातः परतरः स्तवः ।
नातः परतरा विद्या तीर्थं नातः परात्परम् ॥२०॥

इति श्रीवल्लभाचार्यविरचितं निरोधलक्षणं समाप्तम् ।

# अथ सेवाफलम् ।

श्रीकृष्णाय नमः ।

यादृशी सेवना प्रोक्ता तत्सिद्धौ फलमुच्यते ।
अलौकिकस्य दाने हि चाद्यः सिध्येन्मनोरथः ॥१॥
फलं वा ह्यधिकारो वा न कालोऽत्र नियामकः ।
उद्वेगः प्रतिबंधो वा भोगो वा स्यात्तु बाधकम् ॥२॥

१ दुत्कर्षं हरिवर्णने. २ स्वेष्टं. ३ पायुं. ४ भावं. ५ तनुं.

अकर्तव्यं भगवतः सर्वथा चेद्गतिर्न हि ।
यथा वा तत्त्वनिर्धारो विवेकः साधनं मतम् ॥३॥
बाधकानां परित्यागो भोगेऽप्येकं तथा परम् ।
निष्प्रत्यूहं महान् भोगः प्रथमे विशते सदा ॥४॥
सविघ्नोऽल्पो घातकः स्याद्बलादेतौ सदा मतौ ।
द्वितीये सर्वथा चिंता त्याज्या संसारनिश्चयात् ॥५॥
नं॑न्वाद्ये दातृता नास्ति तृतीये बाधकं गृहम् ।
अवश्येयं सदा भाव्या सर्वमन्यन्मनोभ्रमः ॥६॥
तदीयैरपि तत्कार्यपुष्टौ नैव विलंबयेत् ।
गुणक्षो॑भोऽपि द्रष्टव्यमेतदेवेति मे मतिः ॥ ७ ॥
कुसृष्टिरत्र वा काचिदुत्पद्येत स वै भ्रमः ॥ ८ ॥

इति श्रीवल्लभाचार्यविरचितं सेवाफलं समाप्तम् ।

# अथ सेवाफलविवरणम् ।

श्रीकृष्णाय नमः ।

सेवायाः फलत्रयम्–अलौकिकसामर्थ्यं सायुज्यं सेवौपयिकदेहो वा वैकुंठादिषु । सेवायाः प्रतिबंधकत्रयम्–उद्वेगः प्रतिबंधो भोगो वा ॥ त्रयाणां साधनपरित्यागः कर्तव्यः ॥ भोगो द्विविधः–लौकिकोऽ-

१ न त्वाद्ये इति पा०. २ क्षोभेऽपि.